श्री हयग्रीव कवचं

श्री हयग्रीव कवचं

अस्य श्रीहयग्रीवकवचमहामंत्रस्य हयग्रीव ऋषिः, अनुष्टुप्छंदः, श्रीहयग्रीवः परमात्मा देवता, ॐ श्रीं वागीश्वराय नम इति बीजं, ॐ क्लीं विद्याधराय नम इति शक्तिः, ॐ सौं वेदनिधये नमो नम इति कीलकं, ॐ नमो हयग्रीवाय शुक्लवर्णाय विद्यामूर्तये, ओंकारायाच्युताय ब्रह्मविद्याप्रदाय स्वाहा | मम श्रीहयग्रीवप्रसाद सिद्ध्यर्थे जपे विनियोगः ||

ध्यानं –
कलशांबुधिसंकाशं कमलायतलोचनं |
कलानिधिकृतावासं कर्णिकांतरवासिनं || 1 ||

ज्ञानमुद्राक्षवलयं शंखचक्रलसत्करं |
भूषाकिरणसंदोहविराजितदिगंतरं || 2 ||

वक्त्राब्जनिर्गतोद्दामवाणीसंतानशोभितं |
देवतासार्वभौमं तं ध्यायेदिष्टार्थसिद्धये || 3 ||

हयग्रीवश्शिरः पातु ललाटं चंद्रमध्यगः |
शास्त्रदृष्टिर्दृशौ पातु शब्दब्रह्मात्मकश्श्रुती || 1 ||

घ्राणं गंधात्मकः पातु वदनं यज्ञसंभवः |
जिह्वां वागीश्वरः पातु मुकुंदो दंतसंहतीः || 2 ||

ओष्ठं ब्रह्मात्मकः पातु पातु नारायणोऽधरं |
शिवात्मा चिबुकं पातु कपोलौ कमलाप्रभुः || 3 ||

विद्यात्मा पीठकं पातु कंठं नादात्मको मम |
भुजौ चतुर्भुजः पातु करौ दैत्येंद्रमर्दनः || 4 ||

ज्ञानात्मा हृदयं पातु विश्वात्मा तु कुचद्वयं |
मध्यमं पातु सर्वात्मा पातु पीतांबरः कटिं || 5 ||

कुक्षिं कुक्षिस्थविश्वो मे बलिबंधो (भंगो) वलित्रयं |
नाभिं मे पद्मनाभोऽव्याद्गुह्यं गुह्यार्थबोधकृत् || 6 ||

ऊरू दामोदरः पातु जानुनी मधुसूदनः |
पातु जंघे महाविष्णुः गुल्फौ पातु जनार्दनः || 7 ||

पादौ त्रिविक्रमः पातु पातु पादांगुळिर्हरिः |
सर्वांगं सर्वगः पातु पातु रोमाणि केशवः || 8 ||

धातून्नाडीगतः पातु भार्यां लक्ष्मीपतिर्मम |
पुत्रान्विश्वकुटुंबी मे पातु बंधून्सुरेश्वरः || 9 ||

मित्रं मित्रात्मकः पातु वह्न्यात्मा शत्रुसंहतीः |
प्राणान्वाय्वात्मकः पातु क्षेत्रं विश्वंभरात्मकः || 10 ||

वरुणात्मा रसान्पातु व्योमात्मा हृद्गुहांतरं |
दिवारात्रं हृषीकेशः पातु सर्वं जगद्गुरुः || 11 ||

विषमे संकटे चैव पातु क्षेमंकरो मम |
सच्चिदानंदरूपो मे ज्ञानं रक्षतु सर्वदा || 12 ||

प्राच्यां रक्षतु सर्वात्मा आग्नेय्यां ज्ञानदीपकः |
याम्यां बोधप्रदः पातु नैर्ऋत्यां चिद्घनप्रभः || 13 ||

विद्यानिधिस्तु वारुण्यां वायव्यां चिन्मयोऽवतु |
कौबेर्यां वित्तदः पातु ऐशान्यां च जगद्गुरुः || 14 ||

उर्ध्वं पातु जगत्स्वामी पात्वधस्तात्परात्परः |
रक्षाहीनं तु यत्स्थानं रक्षत्वखिलनायकः || 14 ||

एवं न्यस्तशरीरोऽसौ साक्षाद्वागीश्वरो भवेत् |
आयुरारोग्यमैश्वर्यं सर्वशास्त्रप्रवक्तृतां || 16 ||

लभते नात्र संदेहो हयग्रीवप्रसादतः |
इतीदं कीर्तितं दिव्यं कवचं देवपूजितं || 17 ||

इति हयग्रीवमंत्रे अथर्वणवेदे मंत्रखंडे पूर्वसंहितायां श्रीहयग्रीवकवचं संपूर्णं ||